CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपंचक्रोशीमाहात्म्यंप्रारभ्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पं.मा. श्रीगणेशायनमः ॥ ॥ श्रीकपिलउवाच ॥ एवंसिद्धाःकाशिकायांवसेद्यः सर्वैर्द्रुमैःसंयुतः सोतिवंद्यं ॥ न
१ स्याद्धर्माः सततंसिद्धिभूमौ संसेव्याः स्युःपापकंनास्यमत्र ॥१॥ येयेधर्मामानवैः संप्रयुक्ताःकाश्यां
तेतान्मोक्षसिद्धिंनयंति ॥ तस्मात्सिद्धिःसाधयेदात्मकार्यैसद्भिः शास्त्रैः श्रद्धयात्यागयोगैः ॥२॥ का
श्यांकृतानांपापानांपुण्यानांवासमुद्भवः ॥ भवंतिसततंनूनंसुक्षेत्रेह्युप्तबीजवत् ॥३॥ सिद्धाऊचुः ॥ दे
वदेवारविंदाक्षसांख्ययोगप्रवर्तक ॥ कथंमुच्येतमनुजः काश्यामेवकृतैरघैः ॥४॥ मोक्षंप्राप्नोतिचक
थंकथंवाजीवनेसुखं ॥ आनंदकाननेह्यस्मिन् कथमानंदभाग्भवेत् ॥५॥ कपिलउवाच ॥ इदमेवपु
रापृष्टःपार्वत्याभगवान्भवः ॥ पापनाशंधर्मवृद्धिरविलंबेनमोचनं ॥६॥ पार्वत्युवाच ॥ दीनानाथैकशर
णदेवदेवदयानिधे ॥ पाहिलोकान्वदेदज्ञान्सूक्तैः पापप्रणाशनैः ॥७॥ आगत्यशीघ्रंयेप्राप्ताःकाशीं
तीर्णाःक्षणेनते ॥ येतुस्थित्वासुकृतिनस्तेपिशीघ्रंपरंगताः ॥८॥ पापंकृत्वामृतायेचतेषांमुक्तिःकथं रामः
भवेत् ॥ कृपयादेवदेवेशप्रायश्चित्तमशेषतः ॥९॥ महादेवउवाच ॥ शृणुपार्वतिवक्ष्यामियज्ञोप्यं १

CC-0. In Public Domain. Digitization by eGangotri

ममसर्वतः॥ पुण्यवृद्धिः पापवृद्धिः कर्तव्यं काशिवासिभिः॥ १०॥ नकोपिदृष्टोमनुजोविनापापंश
रीरभाक्॥ कुर्वन्नपिमहापुण्यंपापंसंस्कारतश्चरेत्॥ ११॥ देहः स्वकार्यंकुरुतेइंद्रियाणिस्वक
र्मसु॥ प्रवर्त्ततेबलादेवमनः केननिवार्यते॥ १२॥ प्रायश्चित्तानिकिंतानियैः पुनः संप्रवर्तते॥ मनः
शरीरादिपुनः प्रायश्चित्तंननत् भवेत्॥ १३॥ प्रायश्चित्तत्रयंसूक्ष्ममनुभूतंमहात्मभिः॥ ब्रह्महत्या
दिपापानामन्यपापकृतांतुकिं॥ १४॥ काश्यामपिवसन्जंतुर्यदिपापकृदत्रहि॥ प्रायश्चित्तत्रयं
कृत्वासद्योमुच्येतबंधनात्॥ १५॥ देव्युवाच॥ आश्चर्यमेतद्भगवन्त्वयानिगदितंविभो॥ वाराण
स्यांकृतैः पापैर्मुच्यतेयन्नरः सकृत्॥ १६॥ कृपयातत्थैतद्ब्रूहिकलावपिहिनिष्कृतिः॥ कलौकलुष
चित्तानांक्वधर्मः क्वपरंपदं॥ १७॥ श्रीभगवानुवाच॥ शृणुलोकेहितेदेविलोकानामुद्धृतिंपरां॥ प्रा
यश्चित्तत्रयंवच्मिकाश्यैनः संदिधक्षतां॥ १८॥ वापीकूपतडागादिजीर्णोद्धारकृतांनृणां॥ प्रभवेन्न
महत्पापंकाश्यामपिकृतंहियत्॥ १९॥ आपोनाराइतिप्रोक्ताआपोवैनरसूनवः॥ अयनंतस्यताःपू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्वैतेन नारायणः स्मृतः॥२०॥ तेनेश्वरेण हरिणा कृतं पापप्रणाशनं॥ यत्र यत्र जलं काश्यामुड्डरेत्सुकृ
तो नरः॥२१॥ तत्र तत्र मुदायुक्ताः पितरः पर्युपासते॥ काश्यां रुद्रमयाः सर्वे जंतवः श्रुतिनोदिताः॥२२॥ ते
पिबंति जलं यत्र तडागादौ तृषार्दिताः॥ तत्पुण्यं न मया वक्तुं शक्यं वर्षशतैरपि॥२३॥ आसीद्धर्मपथो ना
म वणिक्कश्चित्सुधार्मिकः॥ कुलस्तंभस्स वापग्यै तेन खातः प्रखानितः॥२४॥ तत्र गावो मनुष्याश्च पिबंत्यं
भस्तृषार्दिताः प्रत्यहं तस्य सुकृतं वर्धते चंद्रमा यथा॥२५॥ सूक्ष्मधर्मो मनुष्याणां दुर्लभो विषयात्मनां॥ का
लेन महता तत्र दुर्भिक्षकरपीडितः॥२६॥ दरिद्रतामवापोच्चैः ब्रह्मर्णकृदभूत्ततः॥ ब्राह्मणेन धृतः क्वापि
स्वधनार्थं ऋणी वणिक्॥२७॥ मह्यं देहि हि दुष्टेति परिक्लिष्टः पुनः पुनः॥ ब्राह्मणेन वणिग्धर्मपथो दैन्यमुपा
गतः॥२८॥ इदानीं न धनं किंचिदस्ति ब्राह्मणसत्तम॥ ब्राह्मण उवाच॥ शतत्रयपरीमाणं निष्काणां हेम देहि न
न्॥२९॥ नो चेत्तडागो मन्नाम्ना प्रथितव्यस्तवापरं॥ त्वत्कारितो बहुधनैर्गंभीरो निर्मलोदकः॥३०॥ विमुक्तो
भव दत्वास्मुतडागं लोकसन्निधौ॥ धर्मपथ उवाच॥ अवश्यं मोचयतु मामृणाच्छीघ्रं भवान्प्रभो॥३१॥ त्व

CC-0. In Public Domain. Digitization by eGangotri

णयुक्तास्त्रियंतेचेत्पच्यंतेनरकार्णवे॥जनाश्चोरजनस्यापिगृहीत्वाधनमत्रतु॥३२॥नरकेपरिपच्यंते
ऋणयुक्तानराधमाः॥किंपुनर्ब्राह्मणस्याणुमात्रंहृत्वामृतोहियः॥३३॥ब्राह्मणायदूरिष्यंतिनत्कर्तास्मिनसं
शयः॥सत्तुवार्द्धुषिकोगत्वामेलयित्वाद्विजान्बहून्॥३४॥आनयामासदेवेशिपत्रधर्मपथोवणिक्॥
द्विजैःपृष्टोवणिग्विप्रोकथ्यतांह्वानकारणं॥३५॥परंर्थैवयमाहूतास्तत्कृत्वोपदिशामहे॥धर्मपथउवा
च॥अहंऋणीब्राह्मणस्यनिष्कानांचशतत्रयं॥३५॥गृहीतंव्यवहारार्थंदेवान्नष्टंशनैःशनैः॥असौविनि
यमेनाशुसुवर्णस्यतडागजं॥३६॥सुकृतंप्रार्थयन्नेवनहिचार्पयथोच्यतां॥यथाकथंचिन्मुक्तःस्यांतथा
शीघ्रंविधीयतां॥३७॥ब्राह्मणाऊचुः॥साधूक्तंधर्मपथतेऋणभीत्यामहामते॥सुविचारितमस्माभिर्वक्तव्यंसु
हृढंखलु॥३८॥अस्मान्नाहूयपोधृष्टोनश्रोष्यतिवचोहिनः॥शिरस्तस्यविशीर्णःसन्पतिष्यतिनसंशयः॥
३९॥ब्राह्मणउवाच॥ब्राह्मणानांवचोग्राह्यंमयासर्वात्मनाहितं॥अत्रप्रमाणंभगवान्विश्वेशःपार्वतीप
तिः॥४०॥धर्मपथउवाच॥यद्भूमिदेवैर्वक्तव्यंतन्मयाग्राह्यमेवहि॥अत्रप्रमाणंभगवानविश्वेशःपार्वती॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पं०मा ३

पतिः ॥४१॥ द्विजा ऊचुः ॥ आनेयं तु मनुष्यायेसमर्था महती शिला ॥ इति श्रुत्वा सुबलिभिर्वणिक् धर्मपथः
क्षणात् ॥४२॥ आनयामास विपुलां दृष्ट्वोचुर्ब्राह्मणास्तु तां ॥ निक्षिप्य तां तडागेत्र निमग्ना सु क्षणावधि ॥
४३॥ यावन्मनुष्यैः पशुभिः पथिकैश्चापितज्जलं ॥ पीतं तद्धनपर्याप्तमुन्मज्जतु न तत्त्विपं ॥४४॥ इत्युक्ता सा
शिला विप्रैः पातिता तज्जले शुभे ॥ चक्रुः शिवकथां पुण्यां काशिवासिजनैर्वृतां ॥४५॥ क्षणांतरे गौस्तृषिता
सवत्सा समुपागता ॥ तया पीतं जलं तत्र सा साभवच्छृणु पार्वति ॥४६॥ सा शिला ऋषिमुख्यानां प्रभावाज्जल
मध्यतः ॥ जलोपर्यभवच्छीघ्रं पश्यतां सर्वदेहिनां ॥ यथा तुंबीफलं शुष्कं गच्छतीनीतनस्ततः ॥ तथा लघु
नगजाता पश्य धर्मस्य गौरवं ॥४८॥ सर्वे लोकास्तु तं दृष्ट्वा प्रशंसुर्ऋषिपुंगवान् ॥ अपूर्वं दर्शितं पुण्यमृषि
भिः सुमहात्मभिः ॥४९॥ अहो न दृष्टमस्माभिः कदाचित्सुमहाद्भुतं ॥ पुण्यं सुसूक्ष्मं न जानंति सर्वे लोकाः कथं
चन ॥५०॥ महादेव उवाच ॥ काश्यां किंचिज्जलं यैस्तु संपादितमनामयं ॥ न तेषां पापलेशोपि काश्यामपि
कृतं प्रिये ॥५१॥ परं तु सावधानैर्हि कर्तव्यः सुजलाशयः ॥ अपराधो न भवति महापापकृतक्षयः ॥५१॥ देव्यु

CC-0. In Public Domain. Digitization by eGangotri

वाच॥ जलाशयेकृते देव कारिते वा महात्मभिः॥ कोपराधः पतेत्तत्र तन्ममाचक्ष्व शंकर॥५२॥ महादेव उवा
च॥ काश्यां तिलेतिलेलिंगं काश्यां तीर्थं पदेपदे॥ खननं काशिभूमेस्तु दुर्घटं भाति पार्वति॥५३॥ जीर्णोद्धारं च
ये कुर्युस्ते निःसंदेहा महाधियः॥ स्वयंकृतं यत्त्वानादि तदनेकफलप्रदं॥५४॥ ततोप्यधिकधर्मादि जनकं
जीर्णमुद्धृतं॥ न तत्र लिंगपीडास्यात्तीर्थखननं भवेत्॥५५॥ अतो जीर्णोद्धृतिः कार्या निरवद्या महाफ
ला॥ जीर्णोद्धारं प्रकुर्वंति तेषां विश्वेश्वरः स्वयं॥५६॥ काश्यां कृतानां पापानां मूलोद्धारं करोतिहि॥ योबु
द्धिपर्वं प्रकरोति पापं न तस्य काश्यां मरणं प्रसिध्यति॥५७॥ मृतोपि निर्वाणसुखं न वाप्नुयात् यावत्पिशा
चत्वमवाप्नुयान्नरः॥ देव्युवाच॥ पिशाचत्वस्य मर्यादां ब्रूहि पापस्य चानघ॥ यातना याश्च यद्रूपं वुध्यवु
द्धिकृतं च यत्॥५८॥ भगवानुवाच॥ भवानि भवभीतानां नृणां निस्तारकारणं॥ इष्टं ह्ययकं प्रवक्ष्यामि
भीतानामभयप्रदं॥५९॥ काश्यामागत्य सततं श्रोतव्या काशिसत्कथा॥ न विना श्रवणं पुण्यं पापं वा वे
त्ति कश्चन॥६०॥ विदित्वा पतते भूयो निस्तारायपरायच॥ सर्वलोकेषु वेदेषु विचारः श्रवणाद्भवेत्॥६१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रुतिस्मृतिपुराणेषु सर्वशास्त्रेषु पार्वति ॥ काशी ब्रह्मेति विख्यातं तत्र ब्रह्म प्राप्यतेत्रहि ॥ ६२ ॥ तस्मात्काशी
गुणान्सर्वे तत्र तत्र वदंति हि ॥ श्रुत्वापि पापनिरतास्तान्हन्यात्कालभैरवः ॥ ६३ ॥ संततं निर्दयो भूत्वा या
वत्पापं समाप्यते ॥ महापातकसंयुक्तास्त्रिंशब्दसहस्रकं ॥ ६४ ॥ प्रत्येकं प्राप्नुवंत्येव यातनां कालभैर
वीं ॥ क्षुद्राणि पापानि तु संग्रहेण भवंत्यवश्यं तु महांति तानि ॥ यथा हिरण्यं कणशोपि संचितं निष्कादिवृ
द्धिं भवते भवानि ॥ ६५ ॥ सर्वोपि लोकः कुरुते प्रवृत्तिं प्रवृत्तिभाजां खलु पातकं स्यात् ॥ अतः कियज्जीवित
माकलय्य निवृत्तिरंगीक्रियते मुमुक्षुभिः ॥ ६६ ॥ वाक्पातकं मानसकायिके च प्रवृत्तिमार्गे निरतस्यावश्यं
॥ भवत्यसौ यद्यपि सावधानस्तथापि संस्कारवशादुपैति ॥ ६७ ॥ अतः प्रवृत्तिं परिहाय सेव्या वारा-
णसी साधुजनैः सुखार्थिभिः ॥ नचेद्यथेष्टाचरणेन यत्फलं तद्भोगकाले प्रकटीभविष्यति ॥ ६८ ॥ लौकि
क्यो यातनाः कैश्चित्सोढुं शक्या न पार्वति ॥ किंपुनः कालराजेन कृतास्तीव्रातिदुःखिताः ॥ ६९ ॥ नित्यं
कृतानां क्षुद्राणां पापानां नित्यकर्मणां ॥ नाशः संपाद्यते सद्भिर्गंगास्नानादिभिर्नृभिः ॥ ७० ॥ त्रिंशद्वर्षस

CC-0. In Public Domain. Digitization by eGangotri

हस्राणित्रिंशद्वर्षशतानिच॥पच्यन्तेदुःखसंघोघैःकालराजेनसादरं॥७१॥अतःश्रुत्वातडागादिजी
र्णोद्धारंप्रकल्पयेत्॥क्षेत्रेकृतानांपापानांप्रायश्चित्तंगतंमम॥७२॥असावधानाहिनरात्मनोवैकुर्वं
तिपापानिकिमत्रविचित्रं॥पठंतिजानंतिवदंतिनित्यंतास्तुपंडितास्तेपिविषाग्निमध्यगाः॥७३॥भवंतिदुः
खान्यनुभूयपश्चात्तापेनपापेनचदह्यमानाः॥पुनःपुनर्विषयासक्तचित्ताःशास्त्रंगुरुंदेवमथोनुकाशीं
॥७४॥त्यक्त्वाभूयोविषयेष्वेवबुद्धिंकुर्वंतिसन्त्यांनतुकाशिकायां॥व्यवहारोपितैस्त्यक्तःप्रसिद्धः
सर्वजंतुषु॥मृत्तिकापरिवर्तेनहिरण्यंप्राप्यतेनहि॥७५॥अहोकाश्यांकौतुकंतुपश्यपार्वतिसर्वदा॥
गृहीत्वानरकंदेहंप्रददात्यमृतंपुनः॥७६॥श्रुत्वाध्यायमिमंपुण्यंनदुःखैरभिभूयते॥सुखवासश्चभ
वतिकाश्यांसर्वजनप्रियः॥७७॥इतिश्रीब्रह्मवैवर्तेपंचक्रोशिमाहात्म्येप्रथमोध्यायः॥१॥ ॥श्रीदेव्यु
वाच॥देवदेवमहादेवभक्तानामभयप्रद॥काशीवासःसुगहनःपापिनांधनलोभिनां॥१॥विषयास
क्तमनसांनसुखायकदाचन॥सुखायसर्वलोकानांप्रवृत्तिःकथिताकलौ॥२॥विषयैःपरिपुष्टानांजीव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नेनान्यथा भवेत्॥ प्रायश्चित्तांतरं देव वद स्व यदि मन्यसे॥ ३॥ प्रायश्चित्तविहीनस्य यातना जायते
ध्रुवं॥ विभेमि दीनान्मनुजान्दृष्ट्वा शास्त्रपराङ्मुखान्॥ ४॥ तानप्युद्धर देवेश शठान्स्वेच्छापरिग्रहा
न्॥ महादेव उवाच॥ साधु पृष्टं त्वया देवि क्षेत्रपापकृतां नृणां॥ ५॥ निस्तारः स्याद्यथा मस्तु प्रायश्चित्ते
नयेन हि॥ प्रायश्चित्तविहीनानां यातना बहुदुःखदा॥ ६॥ तस्मात्सर्वप्रयत्नेन प्रायश्चित्तं समाचरेत्॥
जैगीषव्यो मुनिश्रेष्ठस्तपस्वी मत्परायणः॥ ७॥ तेन पृष्टोहमागत्य शिष्यार्थं तद्दयालुना॥ स्तुत्वा मां वैदि
कैः सूक्तैः स्मार्तैः पौराणिकैः शुभैः॥ ८॥ प्रसन्नं मां मुनिर्ज्ञात्वा वचनं चेदमब्रवीत्॥ जैगीषव्य उवाच॥ किं
चिद्विज्ञप्तुकामोहं देवदेव दयानिधे॥ ९॥ आज्ञया प्रवदाम्यज्ञः सर्वज्ञस्य तवाग्रतः॥ मया चोक्तो वद स्व
ति त्वं मद्भक्तः प्रियः शुचिः॥ १०॥ अदेयं तव नास्त्यद्य निर्वाणाद्यपि याच्यतां॥ यस्तु मां सर्वभावेन भजते को
पि मानवः॥ ११॥ न तस्यादेयमस्तीह त्रैलोक्ये सचराचरे॥ जैगीषव्य उवाच॥ अयं मम दुराचारः शिष्यः पा
परतः सदा॥ १२॥ काश्यां वसन्नपि महान्कृत्याकृत्यं न वेत्ति यत्॥ शिक्षितो बहुधास्माभिर्बहुधा ताडितो

पिच॥१३॥ परदारपरद्रोहरतः परधनापहृत्॥ पिशुनः पापनिरतो वेश्यागृहनिवासकृत्॥१४॥ पि
तृमातृगुरुद्रोही विप्रमित्रध्रुगेव च॥ किं बहूक्तेन देवेश पापनिर्वचनं मया॥१५॥ न शक्यते लज्जयास्य
कर्तुं यद्ब्राह्मणो ह्यसौ॥ मया निष्काशितः पाप आश्रमात्स्वात्ततो गतः॥१६॥ किंचित्किंचिच्चेष्टितं हि ज्ञा
त्वा श्रुत्वापि शिक्षितः॥ न करोति यदा किंचिच्छिक्षितं निंदितस्त्वयं॥१७॥ तदा वाग्व्यवहारोपि त्यक्तः सर्वो
त्मना मया॥ मत्सन्निधौ विनयवान्वेश्याचारो बहिः सदा॥१८॥ इति पौरमुखाच्छ्रुत्वा चेष्टितं तस्य दु
र्मतेः॥ मत्सन्निधानाद्दूरच्छ त्वं नो चेच्छप्स्यामि दुष्कृत॥१९॥ मत्तः पठित्वा शास्त्राणि धर्मज्ञानमयानि
च॥ करोषि नित्यं तत्कर्म येन लोकः पराङ्मुखः॥२०॥ बहुधा सर्वलोकेभ्यः श्रुत्वा दुर्विनयं तव॥ त्यक्तो
मयाः यथेच्छं त्वं गच्छ वा तिष्ठ वाधुना॥२१॥ इत्युक्तः स मया शिष्यो लज्जितः पापकृत्तमः॥ गंतुं मतिं
स्वां कृतवान् विहायान्यत्र काशिकां॥२२॥ काशीं परित्यज्य गतो विदूरं विंध्याद्रिकूटं समवाप्य चायं॥ तप
श्चाराशु विशुद्धिकारणं वर्षत्रयं पत्रतृणादिभुक् परं॥२३॥ त्यक्त्वाद्रिकूटं च ततः प्रयातो गोदावरीं भीम

CC-0. In Public Domain. Digitization by eGangotri

रश्चीं ततोपि॥ तत्रापि न स्थास्नुश्चिरं धृतव्रतो न शर्म लेभे सुकृतैकसाध्यं॥२४॥ ततः श्रीशैलमगमद्द्रष्टुं स्वा
मिनमव्ययं॥ स्थितमग्रे विभुं स्कंदं ददृशे नतवान्मजं॥२५॥ तत्रैव वसतिं चक्रे तपः शुद्धं चकार च॥ का
श्यां कृतानां पापानां शुद्धये धर्मवृद्धये॥२६॥ एवं बहुतिथे काले ह्यगस्त्यः कुंभसंभवः॥ काशीविरहदुःखे
न विह्वलस्समुपागतः॥२७॥ हा काशि काशि हा काशि काशि हे काशिके ति च॥ बहुधा व्याकुलो भूत्वा पठन् स्कंदमु
पागतः॥२८॥ वारंवारं श्रवणतः काशीनामामृतस्य हि॥ मया दृष्टः काशिवासी ह्यगस्त्यः स्कंद एव च॥२९
नानातपोभिरत्युग्रैर्नमयास्कंदई स्ततः॥ काशीनामानलेनाशुदग्धपापो हि दृष्टवान्॥३०॥ इति मामुक्तवा
न्पूर्वं पुनः पृष्टो मयात्वयं॥ पुनरूचे तपोः शुद्धं संवादं काशिसंमतं॥३१॥ अगस्त्यमागतं दृष्ट्वा स्कंदः प्रीतम
ना भवत्॥ स्कंद उवाच॥ आगच्छ गच्छ मां शीघ्रं परिष्वज महामुने॥३२॥ काशिकाविरहात्त्वां तु जाने व्याकु
लमानसं॥ त्वादृशानामपि धीराणां योगिनां सुतपस्विनां॥३३॥ काशीविरहजं दुःखं बाधते विदुषां किल॥
जडानां देहगेहादिप्रीतियुक्तमनोधियां॥३४॥ अन्यप्रदेशवत्काशी भाति नित्यं दुरात्मनां॥ त्वं काशीवास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्वन्सः शंकरार्चनतत्परः॥३५॥देवैःस्वकार्यनिरतैःकर्मरूपैर्विवासितः॥काश्यांवसतियःकश्चि
त्काशींपश्यतियश्चहि॥३६॥काशींस्मरतियःकश्चित्सपूज्योममसर्वदा॥इत्युक्त्वापूजितस्तेनस्वामि
नामुनिसत्तमः॥३७॥दत्त्वाचमनपानादिसर्वंपप्रच्छकुंभजं॥स्कंदउवाच॥वदस्वागस्त्यशुद्धात्मन्कं
कामंकरवामते॥३८॥नचास्मद्दर्शनंप्राप्यशोचितुंत्वमिहार्हसि॥अगस्त्यउवाच॥जयदेवमहादेव
तनयानंददायक॥३९॥वाराणसींप्रापयस्वयदितुष्टोसिषण्मुख॥स्कंदउवाच॥त्वंप्राप्स्यसिमहा
बुद्धेविश्रांतेकाशिकांशुभां॥नवापिकर्मगहनकाशींत्यक्त्वानतिष्ठसि॥४०॥नज्ञायतेसूक्ष्मतरंहिकिं
चित्कर्मास्तिलोकस्यसुदुर्विभाव्यं॥योगादियज्ञादितपोभिरुग्रैर्युक्तस्यतेसंप्रतिनास्तिकाशी॥४१॥न
ज्ञायतेसूक्ष्मतरंहिपुण्यंनीचोपिकाश्यांतनुभृत्सदास्ते॥देवादयोपिप्रभवंतिनैवस्थातुंक्षणंकाशि
कायांकुगर्वाः॥४२॥विश्वेशविश्वेशशरण्यशंभोनान्यागतिस्त्वत्पदाब्जंविहाय॥अनेकतापा
र्दिग्धमानसानामस्माकमाकांक्षितदानदक्ष॥४३॥त्वयाकृतेयंजननतापशांतयेप्रपामृतंपायभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुंजनानां॥ नजातिशीलंसुकृतंचापिदृष्ट्वाज्ञानामृतंयच्छसिशंकरश्रुतौ॥४४॥ पुराणशास्त्रश्रु
तिधर्मशास्त्रविद्भिर्नृभिर्गदितंधर्मसाध्यं॥ आशामात्रंसाधनंनःकृपालोनोवाधर्मसांख्यमुक्तंत
पोवा॥४५॥ दीनानहंकारविकारहीनान्प्रयातिकाशीपतिराहतात्मा॥ दीनानाथैकशरणंक्षेत्रंसेव्यंत्व
धिष्ठितं॥ प्राप्यतेनिरहंकारैराशापाशविवर्जितैः॥४६॥ अगस्त्यउवाच॥ प्रमादाद्यदिसूक्ष्मंवास्थूलं
वापातकंनृभिः॥ कृतंकाश्यांतारकारेकथंतस्मात्सुनिष्कृतिः॥४७॥ स्कंदउवाच॥ अविमुक्तेकृतानां
तुपापानांकुंभसंभव॥ नदृष्टानश्रुतावापिसाक्षाच्छिवमुखादपि॥४८॥ निष्कृतिंस्थूलसूक्ष्माणांशिवो
वेत्तिनचापरः॥ जैगीषव्यउवाच॥ इतिश्रुत्वास्कंदमुखाज्ज्ञानत्रासःस्वयंपुनः॥४९॥ सहसामामयाग
त्यप्रार्थयामासशंकर॥ मयापिनश्रुतादृष्टाक्षेत्रपापकृतांनृणां॥५०॥ निष्कृतिःशर्वसर्वेशब्रूहिवेदस्ति
शंकर॥५१॥ श्रीभगवानुवाच॥ जैगीषव्यमुनेत्वंमेभक्तःपरमतापसः॥ श्रुतिस्मृतिपुराणज्ञःकाशीत
त्वविदांवरः॥५२॥ तवाग्रेकथयिष्यामिकाशीमाहात्म्यमुत्तमं॥ प्रायश्चित्तंनास्तिकिंचित्क्षेत्रपापकृतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृणां॥ ५३॥ अस्ति नैकं सुगोप्यं हि त्वदग्रे कथयाम्यहं ॥ प्रायश्चित्तं नान्यदस्ति मुने ज्ञानं विना क्वचित् ॥
५४॥ ज्ञानं च दुर्लभं नृणां विषयासक्तचेतसां ॥ तज्ज्ञानं काशिकायां हि साक्षाद्भवति देहिनां ॥ ५५॥ देहाभिमा
निनां सौख्यं ऋषिणामपि दुर्लभं ॥ अज्ञानं दवने ज्ञानं आच्छादयति दुर्मतिः॥ ५६॥ स्वल्पेनाच्छाद्यते ज्ञानं
अंगुल्या सूर्यवत्खलु ॥ तस्मात्तमिवपोधीरसभवेत् ज्ञानभाजनं॥ ५७॥ नजितेंद्रियता लोके न वैराग्यं तपो
पि न॥ विविक्तसेवा सत्संगश्रवणाद्यपि दुर्लभं॥ ५८॥ अन्यान्यपि मुमुक्षूणां साधनानि महांति च॥ भवं
ति कानिचिद्द्वेषेन चान्यत्राहृतात्मनां॥ ५९॥ भवंति काश्यां सफलानि तानि मोक्षावसानानि सुसाधनानि
॥ सदा सदानंदवने ममालये मया सहायेन सुसाधितानि॥ ६०॥ काश्यां स्थितानां जंतूनां अविचारितक
र्मणां॥ न सुखं न परा शांतिस्तस्मात्काश्यां विचारयेत्कृतं॥ ६१॥ सुखमाप्नोति परमं परां शांतिं प्रयाति हि॥ प्रा
यश्चित्तविहीनानां न शांतिः कुत्रचिद्भवेत्॥ ६२॥ किं पुनः काशिकामध्ये पापं कृत्वा सुखी भवेत्॥ ब्रह्म
हत्यादिपापानां प्रायश्चित्तं हि काशिका॥ ६३॥ काशिकायां कृते पापे प्रायश्चित्तं न विद्यते॥ प्रायश्चि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तविहीनानांयाननास्तिसुदारुणा॥६४॥ज्ञानस्वरूपाकाशीयंपंचक्रोशपरिमिता॥तस्याःप्रदक्षिणां
कृत्वानरःपापैःप्रमुच्यते॥६५॥ममब्रह्ममयंलिंगंआपातालात्समुत्थितं॥सत्यलोकोपरिगतमत्यति
दशांगुलं॥६६॥आजन्मसंचितैःपापैर्मुच्यतेतत्प्रदक्षिणात्॥क्षेत्रेकृतानांपापानांप्रायश्चित्तंनचेतर
त्॥६७॥प्रदक्षिणद्वयंकृत्वादशजन्मकृताद्घात्॥मुक्तोभवति पापात्मासद्योमोक्षमवाप्नुयात्॥६८॥त्रि
भकृद्यदिकुर्याद्विमोहात्पापंनतस्यतत्॥क्षेत्रंप्रदक्षिणीकृत्यभवेत्पापोहिविज्वरः॥६९॥प्रदक्षिणत्रयं
कृत्वापापंजन्मशतार्जितं॥विलयंचप्रयात्येतन्नात्रकार्याविचारणा॥७०॥यावज्जीवंवसेत्काश्यांप्रत्य
व्दंसुप्रदक्षिणं॥कुर्यादेवनिरालस्योज्ञानंदसदनस्यहि॥७१॥प्रत्यव्दंयेप्रकुर्वंतिपंचक्रोशप्रदक्षिणं
॥जीवन्मुक्तास्तकतेज्ञेयानिःपापाःकाशिवासिनः॥७२॥ ॥इतिब्रह्मवैवर्त्ततृतीयभागेपंचक्रोशीमाहा
त्म्येद्वितीयोध्यायः॥२॥ ॥श्रीमहादेवउवाच॥अत्रैवोदाहरंतीममितिहासंपुरातनं॥ऋषिःकृष्णा
ऽतनयोमंडपःसंगदोषतः॥१॥ बालएवममक्षेत्रेपापंचरतिवेदवित्॥ पित्रानिवारितोमात्राभ्रात्रा

CC-0. In Public Domain. Digitization by eGangotri

श्रोत्रियवंशजः ॥ २ ॥ असत्संगंत्यजतिनोविषयासक्तमानसः ॥ परदारपरद्रव्यपरद्रोहरतः सदा ॥
३ ॥ परापवादकुशलोवेदवादविवर्जितः ॥ यथायथावयस्तस्य वृद्धिंप्रापसुदुर्मतेः ॥ ४ ॥ तथा
तथापापरतः सत्संगविमुखः सदा ॥ अपवित्रैस्त्रिभिर्मित्रैः संवृतोराजवेश्मनि ॥ ५ ॥ प्रविष्टोधन
मादायचौर्येणसविनिर्गतः ॥ वेश्यागृहेतन्निक्षिप्यतयासहदिवानिशं ॥ ६ ॥ रमतेमंडपोविप्रःपित्र
विप्रत्वनाशकः ॥ कदाचिद्रममाणोसौतृषार्तःसमपद्यत ॥ ७ ॥ मंचाधस्तात्सपात्रस्यांगृहीत्वापीतवा
न्सुरां ॥ जलबुध्यापातकंतज्जातंतदविचारतः ॥ ८ ॥ किमेतद्धिमयापीतमितिवेश्यांसपृष्टवान् ॥ त
माहसामयानीतंसुरापात्रंसुसौख्यकृत् ॥ ९ ॥ त्वदर्थेसंभृतंमद्यंपुनःपिबसकृत्सकृत् ॥ इतिवेश्यावचः
श्रुत्वाधिग्धिक्पापंमयाकृतं ॥ १० ॥ वेश्यासंगेनमदिरापीताब्राह्मणसूनुना ॥ मंडपस्सततोमित्रह
यमासीत्सुदुःखितं ॥ ११ ॥ वेश्यामुखात्सुरापानंतस्यश्रुत्वाजगर्हतुः ॥ आदौविप्रस्ततोस्माकंसंगीपा
परतःसदा ॥ १२ ॥ सुरापानंततोजातंततस्त्वंकिंकरिष्यसि ॥ आच्छादयावःपापंतेसुवर्णंदेहिनोबहु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पं॰मा॰ ॥१३॥ तथेत्युक्त्वा पुनर्वेश्यागारं गत्वा प्रविश्य सः॥ सुवर्णं याचयामास तताडयामास तं च सा॥१४॥ वे
९ श्योवाच॥ वराक मम लीलायाः स्वादं ज्ञात्वापि मूर्खवत्॥ सुवर्णं याचसे किं त्वं लक्षमात्रं किमन्मम॥१५॥
त्रुवनेत्तुं वने लक्षं बहुभ्यः प्राप्तमद्य वै॥ त्वं मयोपेक्षितो दीनो दत्त्वा नार्थ्यपसे धनं॥१६॥ कामशास्त्रं त्वया
मूढ पठितं न कदाचन॥ यतो लीलां न जानासि मम कंदर्पमोहिनीं॥१७॥ गच्छ गच्छ सुखेनाद्य यावद्दा
स्यो न संति मे॥ ताडयिष्यंति सर्वास्त्वां निर्लज्जं ब्राह्मणाधमं॥१८॥ वेश्यागृहात्ततस्तूर्णं क्षुधितोपि पिपा
सितः॥ पितुः सकाशमगमन्मातुश्च प्रियकाम्यया॥१९॥ दृष्टस्तो द्वारकौ प्राप्तौ मित्रत्वे परिकल्पितौ॥ वदं
तौ देहि कनकं अस्मदंशं त्वमाशु वै॥२०॥ राज्ञो गृहाद्यदानीतं स्तेयेनास्माभिरुत्तमं॥ इति श्रुत्वा पिता
तस्य महादुःखसमन्वितः॥२१॥ उवाच द्वारकौ भीतः कौ युवां केन कर्मणा॥ कोऽभवत्तौ कथं संगः कृतोने
नदुरात्मना॥२२॥ तद्धिरण्यं हि कुत्रास्ते यदर्थं वां व्यवस्थितौ॥ द्वारकावूचतुः॥ अहं कुविंदस्त्वत्पुत्रो मंड रामः
पो नापितस्त्वयं॥२३॥ मैत्री त्रयाणां संजाता देवाद्दोपत्रयात्मिका॥ विभज्य भागाः सर्वे हि ग्राह्या इति विधिः ९

CC-0. In Public Domain. Digitization by eGangotri

कृतः॥२४॥अनेनवेश्याभवनेनिक्षिप्तंस्वर्णमेवहि॥सानप्रयच्छतिमुनेवेश्यावादविवादिनी॥२५॥अतः
परंराजगृहंगंतव्यंवकुमेवहि॥देहिद्रापयवास्माकंधनंशीघ्रंहिदुःखदं॥२६॥नोचेत्तवात्मजःसाधोशूलप्रो
तोभविष्यति॥रक्षपुत्रंतथास्माकंस्वस्थात्मानमपिचानघ॥२७॥कूष्मांडउवाच॥आगच्छतममपार्श्वेराजरा
जस्यसन्निधौ॥पुत्रंगृहीत्वाऽगच्छामिशास्त्यर्थंधर्मतोयथा॥२८॥राजभिःकृतदंडास्तुशुध्यंतिमलिनानराः॥अ
निर्वैशकृतःपापागच्छंतिनरकंमृताः॥२९॥दारकावूचतुः॥पुत्रंसमर्पयमुनेकिमर्थंत्वंगमिष्यसि॥राज्ञाग्रहे
विवादार्थंनगंतव्यंकदाचन॥३०॥कूष्मांडउवाच॥भवत्सहनसंबंधइत्युक्तानीयतांसुतः॥नोचेदहंगमिष्यामि
राजवेश्मसुनिश्चितं॥३१॥दारकावूचतुः॥त्वयासहनसंबंधोदेहिमित्रद्रुहंशठं॥अस्माभिरेवगंतव्यंत्वंज्येष्ठ
त्लिष्ठलज्जितः॥३२॥कूष्मांडउवाच॥पुत्रगच्छद्विजश्रेष्ठद्विजकृत्यंत्वयाकृतं॥प्रायश्चित्तंविधायाशुराज्ञादत्तंन
चान्यथा॥३३॥आगंतव्यंत्वयावत्सनोचेद्याहियथासुखं॥तावन्नाहंतवपितानसुतस्त्वंममाघवान्॥३४॥ईश्वरउवा
च॥जैगीषव्यमुनिश्रेष्ठतेनविप्रेणमंडपः॥समर्पितस्तयोःपुत्रस्नेहमुत्सृज्यदूरतः॥३५॥धार्मिकाणांधनैःपुत्रैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पं·मा· कलत्रैः किं प्रयोजनं॥ धर्मसंग्रहशीलानां यतस्ते काशिवासिनः॥ ३६॥ पुत्रो भ्राता पिता वापि यः कश्चं पापमा
१० चरेत्॥ त्याज्य एव स पापात्मा भवेत्संसर्गजाद्भयं॥ ३७॥ तं नीत्वा तौ दूरदेशं ताडयामासतुः क्रमं॥ स ताड्यमानो
मूर्च्छां तु प्राप मृत्युसमां मुने॥ ३८॥ मृतोयमिति चोत्सृज्य ययतुस्तौ विषण्णवत्॥ पश्चात्तापेन संयुक्तावस्मं
गमसन्निधौ॥ ३९॥ त्यक्त्वा विप्रसुतं भीतौ गतौ सिद्धेश्वरालयं॥ तत्रोषित्वा तु तां रात्रिं दुःखितौ सुषुपतुर्भृशं॥ ४०
॥ पश्चात्तापपरीतौ तु पुनरन्वेषितुं गतौ॥ मृतो वा जीवति तु वा ज्ञात्वा देशं त्यजावहे॥ ४१॥ यावद्विचारणपरा
वागतावसिसंगमे॥ तावद्द्विजसुतो भीतो गतमूर्च्छः प्रतस्थिवान्॥ ४२॥ पंचक्रोशात्मकस्यैव शिवलिंगस्य
तद्दिने॥ प्रदक्षिणं प्रकुर्वन्ति शिवमाहात्म्यवेदिनः॥ ४३॥ क्षेत्रप्रदक्षिणकृतां तत्संगेन विनिर्गतः॥ तस्मिन्दिने
कर्दमेशसन्निधौ यात्रिणः स्थिताः॥ ४४ सोपि तत्र स्थितो विप्रो मंडपो मंडपोभवत्॥ रात्रौ जागरणं तेन कृतं नृत्यं शि
वाग्रतः॥ ४५॥ सर्वैः प्रोत्साहितः साधु साधु साध्विति साध्विति॥ अयं परमशैवस्य कूष्मांडस्य तु मंडपः॥ ४६॥ रामः
पुत्रः शिवव्रतधरः साधु नृत्यति गायति॥ न तस्य चेष्टितं कोपि तन्मध्ये वेत्ति तत्वतः॥ ४७॥ अत एवादृतः सद्भिर्मे १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्किंदृष्ट्वाबहिर्गतां ॥ सोपिचारुविचित्रांगः सर्वेषांसुमनोहरः ॥४८॥ बभूवसद्भक्तिपरः सत्संगेनद्विजोत्तमः
॥ विचार्यैमनसिह्येवंशिवभक्त्यासतांप्रियः ॥४९॥ ततोस्मिन्दुष्टोपिसदापंचपातकसंयुतः ॥ साधुवादः सतां
ह्येषोभवतिप्रत्यहंमम ॥५०॥ धनधान्यादिलब्धिश्चभोजनाच्छादनानिच ॥ अनायासेनलभ्यंतेऋजुमार्गेण
नित्यदा ॥५१॥ शिवेभक्तिः सतांतुष्टिर्देहपुष्टिर्निराकुला ॥ येनमार्गेणभवतिसमार्गः सर्वसंमतः ॥५२॥ एवंविचार
यन्सोयचंडिकांप्रापमंडपः ॥ तत्रपूजांभीमचंड्याः कृत्वाकाशिनिवासिभिः ॥५३॥ ब्राह्मणैर्भोजितः सम्यग्
हत्याशिवभक्तिकृत् ॥ उपविष्टास्ततोरात्रौदेव्याः पुरतआदरात् ॥५४॥ क्षेत्रमाहात्म्यकथनंश्रवणंचक्रुरुत्सुकाः
॥ ततोविष्णुजनाः शैवाः कीर्तनंचक्रुरादृताः ॥५५॥ तन्मध्येमंडपः शौंडोनृत्यंगानंचकारह ॥ साधुवादेनमहता
पुनस्तैः साधुसत्कृतः ॥५६॥ तस्यापिहिमनोब्रह्मन्क्विवेमपिसमाहितं ॥ अथतृतीयेदिवसेमार्गएवसमंडपः ॥
५७॥ नृत्यन्गच्छतिगायन्सस्तवमेवशिवस्तवं ॥ पदेपदेदक्षिणतः क्षेत्रस्यममसद्द्विजः ॥५८॥ ब्रह्महत्यादि
पापानांप्रायश्चित्तंभवेद्यथा ॥ महादेवमहादेववासुदेवशिवेतिच ॥५९॥ स्मरन्नृत्यन्सभोक्ष्णंसस्तैरपिबहिःकृतः ॥

तृतीयेदिवसेगत्वानंदेहलिविनायकं॥ ६०॥ पूजयामासुरव्यग्राःकाशीभक्तिविवृद्धये॥मंडपोलौल्यरहितः

शिवनामपरायणः॥ ६१॥ बलादन्नमपित्यक्त्वाहरिकीर्तनतत्परः॥नाश्नातिनपिबत्यंभोनकस्यापिवशेस्थि
तः॥ ६२॥ निर्द्वंद्वःसमदृक्शांतोबभूवागतसाध्वसः॥ब्राह्मणेनमयास्तैन्यंसुवर्णस्यकृतंरहः॥ ६३॥ वंचितं
श्चपितामान्योमातासाध्वीचवंचिता॥पापेनोपार्जितंवित्तंवेश्यावेश्मनितिष्ठति॥ ६४॥ मनसाविप्रहननं
गमनंभर्तुरेवच॥संपन्नंचसुरापानंसाक्षाद्वेश्यागृहेपिकिं॥ ६५॥ आहारोमैथुनंनिद्रामिथ्यावादादयो
पिहि॥जातामामवराकस्यकथंपापपरिक्षयः॥ ६६॥ अनुतापैःसुसंतप्तोमंडपोमंडवर्जितः॥क्षेत्रप्रदक्षिणं
कुर्वन्निःपापःसमपद्यत॥ ६७॥ क्वचिद्रुदतिसंस्मृत्यसंस्मृत्यस्वाघसंचयं॥क्वचिद्धसतिक्षेत्रस्यप्रदक्षिणकृ
दित्यहं॥ ६८॥ काशीकाशीतिकाशीतिशिवशंकरकेशव॥पाहिमांपतितंदीनंगुरुदेवापराधिनं॥ ६९॥ रामेश्व
रंसमागम्यस्नात्वासंतर्प्यदेवताः॥रामेश्वरंसमभ्यर्च्यसोमनाथंतथार्च्यह॥ ७०॥ रामंराजीवपत्राक्षंसीता
लक्ष्मणसंयुतं॥नभुंक्तेनपिबत्यंभोनृत्यगीतादितत्परः॥ ७१॥ प्रार्थ्यमानोपिगृह्णातिनकिंचिदपिरवेदं

CC-0. In Public Domain. Digitization by eGangotri

कृतन्॥ ततः प्रचलिताः सर्वे यात्रिणः शिवतत्पराः॥७२॥ मंडपोपि स्मरन् काशीं शिवं विष्णुं प्रनस्थिवान्॥
वृषभध्वजमागत्य स्नात्वा वै कापिलेह्रदे॥७३॥ देवं संपूज्य विधिवत् स्थित्वा तत्र च पूर्ववत्॥ तत्रः प्रभाते
वरुणासंगमे स्नानमाप्य च॥७४॥ गताः सर्वे विश्वनाथं द्रष्टुं श्रीपार्वतीपतिं॥ तत्र स्थित्वा महापूजां कृत्वा
सर्वे महाजनाः॥७५॥ अन्नानि वासो रत्नानि ददुः शंकरतुष्टये॥ मंडपोपि तथा कृत्वा मोक्षमंडपमध्यतः
॥७६॥ साष्टांगं प्रणतः प्राह तत्स्थो मध्यगोऽघकृत्॥ मया पापानि सर्वाणि सुमहांति बहूनि च॥७७॥ कृता
नि तत्र वदत्त निष्कृतिं मम सत्तमाः॥ यथाहं पापनिर्मुक्तो भवामीह तदुच्यतां॥७८॥ सदस्या ऊचुः॥ त्वं निः
पापोसि भक्तोसि शिवयोः केशवस्य च॥ पंचक्रोशात्मकं लिंगं सत्संगाद्दक्षिणीकृतं॥७९॥ मैत्री वाणिज्य
मूल्याद्यैः किं पुनः श्रवणादिभिः॥ येन केनापि सुमहत्पापं तस्य न विद्यते॥८०॥ मंडप उवाच॥ पित्रा
निष्कासितः सोहं कथं यास्यामि तद्गृहं॥ प्रतीतिकरणं किंचिदस्ति चेद्ब्रूत मे मम॥८१॥ प्रेषयंतु तदा स
भ्याः शास्त्रप्रत्ययसंयुताः॥ गार्हपंतिगृहस्यानो नो चेत्किं गमनेन मे॥८२॥ सदस्या ऊचुः॥ आकार

CC-0. In Public Domain. Digitization by eGangotri

पं॰मा यस्त्वपितरं अस्मद्वचनगौरवात्॥ प्रतीतिं दर्शयामोद्य दंडनाथस्य सन्निधौ॥ ८३॥ महादेव उवाच॥ मं
१२ डपोयगृहद्वारं गत्वा शिवशिवेतिच॥ महादेव महादेवेत्युक्त्वा तूष्णीं व्यवस्थितः॥ ८४॥ कूष्मांडः प्राहदंपि
ताकोतिथिर्द्वारि वर्त्तते॥ पश्य पश्याशु सुभगे शिववाक् शंकरप्रियः॥ ८५॥ साभर्त्तुर्वचनाद्गत्वा दृष्ट्वा मंडप
मात्मजं॥ उवाच वचनं भीता भर्त्तुः पुत्रार्थमातुरा॥ ८६॥ अकृत्वैव वचनिर्वेशं कथमागमनं वद॥ मंडप उवाच
॥ आहूयंति सद्स्यास्त्वां पितरं च ममानघ॥ ८७॥ निर्वेशवार्त्ता बहुलां तएवब्रूयुरग्रतः॥ जननीमंडपस्या
थगत्वा कूष्मांडमब्रवीत्॥ ८८॥ पुत्रस्ते कृतनिर्वेशः शिवस्मरणतत्परः॥ द्वारि तिष्ठति सद्देषोनातिथिः क
श्चनेतरः॥ ८९॥ कृतनिर्वेशमनघं श्रुत्वा पुत्रंतु सद्द्विजः॥ उत्थायागत्य सहसा ददर्श शिवरूपिणं॥ ९०॥
रुद्राक्षमालिनं शांतं विभूतिकृतभूषणं॥ उवाच किं समायातः शीघ्रं पुत्रं तथाघवान्॥ ९१॥ नहि स्वल्पे
न पुण्येन प्राप्यश्विनं महद्भवेत्॥ मंडप उवाच॥ मया बहूनि पापानि कृतानि विविधानि च॥ ९२॥ न त्रातं राम
तेन पापित्रा किमन्यैर्दूरसंस्थितैः॥ बलात्वामाव्हयंत्येव सद्स्याः शुद्धिदर्शिनः॥ ९३॥ यद्रोचते कुरु १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथात्वं मत्स्नेहेन मा व्रज ॥ इति श्रुत्वा मंडपस्य वचः पत्न्या समन्वितः ॥ ९४ ॥ मुक्तिमंडपिकां प्राप सद्स्यैः
संस्थितां शुभां ॥ तैराहूतो द्विजवरैर्धर्माधर्मार्थदर्शकैः ॥ ९५ ॥ उपाविष्टं तमूचुस्ते पुत्रस्ते शुद्धिमागतः ॥
कूष्मांड उवाच ॥ प्रायश्चित्तेन केनासौ शुद्धिं प्राप्तो ममात्मजः ॥ ९६ ॥ प्रतीतिर्मम वा कास्याद्यदनेन तु भुज्यते
॥ सदस्या ऊचुः ॥ मुक्तिमंडपिकायास्तु स्वामी विष्णुर्न चापरः ॥ ९७ ॥ स चेद्वदति वेदात्मा नदोषः कान
चोत्तरं ॥ तत्पार्षदाभात्तु मुख्या वदिष्यंति च सत्तम ॥ ९८ ॥ तदा मन्यस्व सुप्री- नः शास्त्रदेवप्रसादनः ॥
इत्युक्त्वा च सदस्यास्ते तुष्टुवुर्विष्णुमव्ययं ॥ ९९ ॥ रविंढुंढिं दंडपाणिं भैरवं चैव पंचमं ॥ पंचापि तत्र सु-
प्रीताः मुक्तिमंडपमध्यतः ॥ १०० ॥ प्रादुर्भूता महात्मानो लोकप्रत्ययकारकाः ॥ विष्णुरुवाच ॥ अयं शु-
द्धो महापापो मंडपः साधुसंगतः ॥ १ ॥ काश्याः प्रदक्षिणं कृत्वा ह्यर्चयित्वा जगद्गुरुं ॥ माहात्म्यश्रवणं ज्ञा
तं क्षेत्रस्याशुभनाशनं ॥ २ ॥ तस्मादयं गच्छतु स्वं गृहं पितृसमन्वितः ॥ ढुंढिरुवाच ॥ काशीति नाम ज
प्तं शिवनाम तुल्यं विघ्नादि पापनिचयो विलयं प्रयाति ॥ किं तत्कथाश्रवणकीर्तनवासदानैः सम्यक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पं·मा प्रदक्षिणवतामशुभस्य नाशः॥३॥ दंडपाणिरुवाच॥ काश्यां पापं ये प्रकुर्वंति पापास्तेषां दुःखं जाय
१३ तेवश्यमेव॥ शंभोर्लिंगं सच्चिदाकाशरूपं पंचक्रोशं तत्परिक्रम्य शुद्धः॥४॥ भैरव उवाच॥ कार्यं ममैत
त्खलु पापिनां सदा करोमि दंडं बहुधावश्यमेव॥ प्रदक्षिणीकृत्य समागतस्त्वयं काशीं विशुद्धो न विचा
रमस्मिन तु॥५॥ रविरुवाच॥ सत्संगतः क्षेत्रसुदक्षिणीकृतं काशीकथाश्रवणकीर्तनादयं॥ शुभप्रदं पा
पहरं सुवासदं कृतं च शुद्धो मंडपः सत्यमेव॥६॥ महादेव उवाच॥ सभासदैर्देववरैरुक्तौ कुष्मांडमंडपौ॥
प्रदक्षिणीकृत्य तु तान्नमस्कृत्य पुनः पुनः॥७॥ निःपापौ हर्षसंपूर्णौ ययतुस्तौ स्वमालयं॥ प्रदक्षिणफलं
ब्रह्मन् पंचक्रोशात्मकस्य हि॥८॥ लिंगस्य यन्मया प्रोक्तं सुगोप्यं पुरुषार्थदं॥ श्रुत्वा माहात्म्यमतुलं पं
चक्रोशात्मकस्य च॥९॥ लिंगस्य दक्षिणा कार्या त्वया शिष्येण चानघ॥ इति श्रुत्वा प्रसन्नात्मा जैगीष
व्यो महामुनिः॥१०॥ देवं प्रदक्षिणीकृत्य नमस्कृत्य पुनः पुनः॥ जगाम पंचक्रोशस्य यात्रार्थं शिष्यसंयुतः रामः
॥११॥ पंचभिर्दिवसैः कृत्वा यात्रामत्रागतो मुनिः॥ उपविष्टो विधिः सम्यक् यात्रायाः पापनाशनः॥१२॥ १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयापुण्यकृद्देवापिनिर्विघ्नफलदायकः॥मुनिरागत्यविश्वेशंभवान्यासहितंतदा॥१३॥पूजयामासवि
धिवद्दुपचारैःसुविस्तरैः॥शिष्योगुरुप्रसादेननिःपापोपुण्यवान्सुधीः॥१४॥जातःस्कंदप्रसादेनस्तुत्वा
माहात्म्यमुत्तमं॥महादेवउवाच॥एतत्तेकथितंदेवकाश्यांपरमानकंस्तनं॥तस्यप्रणाशनंशुद्धंप्रायश्चितं
सुदुर्लभं॥१५॥श्रुत्वाध्यायमिमंपुण्यंसर्वपापप्रणाशनं॥नरःशुद्धिमवाप्नोतिकाशीवासंचगर्भहृत्॥१६
॥इतिश्रीब्रह्मवैवर्त्तेतृतीयविभागेपंचक्रोशीमाहात्म्येतृतीयोध्यायः॥३॥ ॥ऋषयऊचुः॥सूतसूतमहा
बुद्धेवरविद्याविशारद॥यथाप्रदक्षिणाकार्यामनुजैर्विधिपूर्वकं॥१॥स्थानंवासस्यवदनोभक्ष्यंचाभक्ष्य
मेवच॥पूजांतस्मिन्स्थितानांचदेवानांदानमेवच॥२॥यथासंपूर्णतामेतियात्राक्षेत्रस्यसत्तम॥सूत
उवाच॥एवमेवपुराष्टष्टोभगवान्शिवयाशिवः॥३॥तत्तद्ब्रवीमिमुनिश्रेष्ठाःशृण्वंतुविधिवन्मम॥
श्रीदेव्युवाच॥भगवन्देवदेवेशप्रदक्षिणविधिंवद॥४॥पंचक्रोशस्ययेनासौनिष्पापःपुण्यवान्
भवेत्॥श्रीमहादेवउवाच॥आश्विनादिषुमासेषुत्रिषुपार्वतिसत्तमे॥५॥प्रदक्षिणाप्रकर्त्तव्याक्षेत्रस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पं॰मा॰ पापकांस्त्रिभिः॥ माघादिचतुरोमासाः प्रोक्ता यात्राविधौ नृणां॥६॥ पूर्वस्मिन्दिवसे ढुंढिं पूजयित्वा हवि
१४ ष्यभुक्॥ प्रातरुत्तरवाहिन्यां स्नात्वा विश्वेशमर्चयेत्॥७॥ पुनर्यात्रार्थमपि च शिवयोः पूजनं भवेत्॥ मु
क्तिमंडपिकायां च संविश्य वरवर्णिनि॥८॥ प्रतिज्ञां महतीं कृत्वा पूजनं तत्र तत्र ह॥ काश्यां प्रजानता क्षाम्य
मनोजनितमुक्तये॥९॥ ज्ञाताज्ञातविमुक्त्यर्थं पातकेभ्यो हि तापन॥ पंचक्रोशात्मकं लिंगं ज्योतिरूपं सना
तनं॥१०॥ भवानीशंकराभ्यां च लक्ष्मीश्रीशविराजितं॥ ढुंढिराजादिगणपैः षट्पंचाशद्भिरावृतं॥११॥ द्वा
दशादित्यसहितं नृसिंहैः केशवैर्युतं॥ कृष्णरामत्रययुतं कूर्ममत्स्यादिभिस्तथा॥१२॥ अवतारैरनेकै
श्च युतं विष्णोः शिवस्य च॥ गौर्यादिशक्तिभिर्जुष्टं सेव्यं कुर्यात्प्रदक्षिणं॥१३॥ बद्धांजलिः प्रार्थयीत महादे
वं महेश्वरीं॥ पंचक्रोशस्य यात्रां वै करिष्ये विधिपूर्वकं॥१४॥ प्रीत्यर्थं तव देवेश सर्वाघौघप्रशांतये॥
इति संकल्प्य मौनेन प्रणिपत्य पुनः पुनः॥१५॥ ढुंढिराज गणेशान महाविघ्नौघनाशन॥ पंचक्रोशस्य यात्रा रामः
र्थं देह्याज्ञां कृपया विभो॥१६॥ विश्वेशं त्रिः परिक्रम्य दंडवत्प्रणिपत्य च॥ मोदं प्रमोदं सुमुखं दुर्मुखं ग १४

CC-0. In Public Domain. Digitization by eGangotri

णनायकं॥१७॥ प्रणम्य पूजयित्वादौ दंडपाणिं ततोर्चयेत्॥ कालराजं च पुरतो विश्वेशस्य जगद्गुरोः॥१८॥ पूजयित्वा ततो गच्छेन्मणिकर्णीं विधानतः॥ तत्र स्नात्वा महादेवं मणिकर्णीशमर्चयेत्॥१९॥ विनायकं सिद्धिसंज्ञं पुनरागत्य पूजयेत्॥ मणिकर्णीतटे गच्छेन्गंगाकेशवमच्युत॥२०॥ ललितां च ततः पूज्य जरासंधेश्वरं विभुं॥ सोमनाथं ततः पूज्य दालभ्येश्वरमेव च॥२१॥ शूलटंकेश्वरं लिंगं वाराहं पूज्य च व्रजेत्॥ दशाश्वमेधलिंगं च वंदीं नत्वैव पूजयेत्॥२२॥ सर्वेश्वरं च केदारं ततो हनुमदीश्वरं॥ संगमेशं ततः पूज्य लोलार्कं पूजयेत्ततः॥२३॥ अर्कसंज्ञं गणाध्यक्षं असेस्तीरे पुनर्व्रजेत्॥ क्षेत्रप्रदक्षिणां कुर्वन्तिलमात्रं न संत्यजेत्॥२४॥ दुर्गाकुंडे नरः स्नात्वा यजेद्दुर्गविनायकं॥ दुर्गां संपूज्य विधिवत् वसेत्तत्र सुखाप्तये॥२५॥ ब्राह्मणान्भोजयेत्तत्र मधुपायसलड्डुकैः॥ रात्रौ जागरणं तत्र पुराणश्रवणादिकं॥२६॥ कुर्याच्च कीर्तनं भक्त्या परोपकरणादि च॥ जय दुर्गे महादुर्गे जय काशीनिवासिनि॥२७॥ क्षेत्रविघ्नहरे देवि पुनर्दर्शनमस्तु ते॥ इति दुर्गां प्रार्थयित्वा विष्वक्सेनेश्वरं ततः॥२८॥ पूजयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वाकर्दमेशं पंचग्रीहितिलैर्नमेत्॥ आदौ कर्दमतीर्थे तु स्नानं कूपावलोकनं॥ २९॥ सोमनाथं विरूपाक्षं नी
लकंठं ततोऽर्चयेत्॥ तत्र वासं विधायाग्नौ किंचिद्धोमं द्विजार्चनं॥ ३०॥ श्राद्धादिविधिं कृत्वा निष्क्रान्त्वा मुच्येत
ऋणत्रयात्॥ कर्दमेश महादेव काशीवासजनप्रिय॥ ३१॥ त्वत्पूजनान्महादेव पुनर्दर्शनमस्तु ते॥ प्रातः
स्नात्वा पूजयित्वा समर्च्य च द्विजानपि॥ ३२॥ नागनाथं च चामुंडां मोक्षेशं करुणेश्वरं॥ वीरभद्रं ततो दुर्गं
विकटाख्यां प्रपूजयेत्॥ ३३॥ उन्मत्तभैरवं नीलं कालकूटं ततोऽर्चयेत्॥ दुर्गां च विमलां नत्वा महादेवं त
तो व्रजेत्॥ ३४॥ नंदिकेशं भृंगिरीटिं तत्रैव च गणप्रियं॥ विरूपाक्षं च पक्षेशं विमलेश्वरमेव च॥ ३५॥ मो
क्षदं ज्ञानदं चैव अमृतेशं तत्र पूजयेत्॥ गंधर्वसागरं तीर्त्वा भीमचंडीं ततो व्रजेत्॥ ३६॥ तत्र स्नात्वा भीमचंडीं
पयसा स्नापयेत्सुधीः॥ पंचोपचारैः संपूज्य ब्राह्मणान् परितोषयेत्॥ ३७॥ तत्र वासं प्रयत्नेन कुर्याच्चंडविना
यकं॥ रविरक्ताक्षगंधर्वं नरकार्णवतारकं॥ ३८॥ शिवं प्रपूज्य यत्नेन रात्रौ पूर्ववदाचरेत्॥ प्रातरुत्थाय सु
स्नातः प्रार्थयेद्भीमचंडिकां॥ ३९॥ भीमचंडी प्रचंडानि मम विघ्नानि नाशय॥ नमस्तेऽस्तु गमिष्यामि पुनर्दर्शन

CC-0. In Public Domain. Digitization by eGangotri

मस्तुते॥४०॥ततोगच्छेद्देकपादंगणंनत्वाथतंडुलान्॥तिलांश्चविकिरेत्तत्र धनधान्यादिसंपद्‌ ४१ततोग
च्छेन्महाभीमंभैरवं भैरवींशुभां॥भूतनाथंचसोमेशंप्रपूज्यसिंधुरोधसि॥४२॥कालनाथंकपर्दीशंकामेशं
चगणेश्वरं॥वीरभद्रंचारुमुखंगणनाथंप्रपूजयेत्‌॥४३॥ततोगच्छेद्देहलीशंविघ्नपूगनिवारणं॥मोद
कैः२शुकैर्लाजैःसक्तुमिश्रैस्तुपर्वभिः॥४४॥पूजयेच्छुद्धयादेवंतंदेहलिविनायकं॥तत्पार्श्वेषोडशपुन
र्विघ्ननाथान्समर्चयेत्‌॥४५॥उद्दंडगणंपंपूज्यउत्कलेश्वरमेवच॥रुद्राणयास्तुततोभूमिंदृष्ट्वारामेश्वरंव्र
जेत्‌॥४६॥वरुणायांततःस्नात्वातर्पणादिविधानतः॥रामेश्वरंश्वेततिलैर्बिल्वपत्रादिभिर्यजेत्‌॥४७॥
सोमनाथंतुतत्रैवपूजयेदिंद्रदिग्गतं॥भरतेशंलक्ष्मणेशंशत्रुघ्नेश्वरमेवच॥४८॥द्यावाभूमिश्वरंतत्रपू
जयेन्नहुषेश्वरं॥तत्रवासंप्रकल्प्याथपूर्ववज्जागरादिकं४९कृत्वास्नात्वाथरामेशंपूजयेत्काशिवासदं॥श्रीरा
मेश्वररामेणपूजितस्त्वंसनातन॥५०॥आज्ञांदेहिमहादेवपुनर्दर्शनमस्तुते॥लिंगानिसुबहून्यात्रैवरुणा
पारगान्यथ॥५१॥पूजयित्वाततोगच्छेद्देवसंघनिषेवितं॥देवसंघेश्वरंकिंचिद्दत्वास्थित्वाततोव्रजेत्‌॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥५२॥ पाशपाणिं गणेशं च क्षेत्रमध्ये व्यवस्थितं॥ पूजयित्वा बहिश्चैव वटेश्वरमथो व्रजेत्॥५३॥ एकोश्व
मेधः पृथुना कृतः क्षेत्राद्बहिः पुरा॥ स्वर्गभूमिस्तु सा ज्ञेया मोक्षभूमिस्तु मध्यतः॥५४॥ काश्याश्च नु दिशं देवि
योजनं स्वर्गभूमिका॥ मृतास्तत्र हि गच्छंति स्वर्गं सुकृतिनां पदं॥५५॥ ततस्तु यूपं हि सरः पृष्ठागच्छेच्छनैः
शनैः॥ महाक्षेत्रं कापिलं तु यत्र श्रीवृषभध्वजः॥५६॥ तत्र स्नात्वा विधानेन तर्पयित्वा पितॄन्नथ॥ श्राद्धं विधाय
सुश्रद्धः पूजयेद्वृषभध्वजं॥५७॥ निवसेत्तं तु दिवसं पुराणादि प्रकल्पयेत्॥ प्रदक्षिणीकृत्य ततो गच्छेज्ज्वाला
नृसिंहकं॥५८॥ एवं प्रदक्षिणीकृत्य सरः कापिलमुत्तमं॥ वरुणां च ततस्तीर्त्वा स्नात्वा वै संगमे शुभे॥५९॥
आदिकेशवमभ्यर्च्य संगमेश्वरमेव च॥ विनायकं खर्वसंज्ञं पूजयित्वा ततो व्रजेत्॥६०॥ क्रोडीकृत्य यवान्
मुद्रान् विकिरन् विष्णुमुच्चरन्॥ प्रल्हादेश्वरमभ्यर्च्य त्रिलोचनमतः परं॥६१॥ विंदुमाधवमभ्यर्च्य ह्रदे
पांचनदे शुभे॥ गभस्तीशं मंगलां च गौरीं दृष्ट्वा ततो व्रजेत्॥६२॥ वसिष्ठवामदेवौ च पर्वतेश्वरमेव च॥ महे
श्वरं समभ्यर्च्य ततः सिद्धिविनायकं॥६३॥ सप्तावरणगान् दिव्यान् पूजयेद्गणनायकान्॥ मणिकर्ण्यां ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नात्वागच्छेद्विश्वेश्वरं यमी॥६४॥नमस्कृत्य महेशानं प्रविशेद्देवसन्निधौ॥ पंचोपचारैः संपूज्य स्तुत्वान
त्वा पुनः पुनः॥६५॥मुक्तिमंडपमागत्य कृतार्थस्तत्र संविशेत्॥विष्णुं च दंडपाणिं च ढुंढिं भैरवमेव च॥६६॥आ
दित्यं पंचगणपान् पूजयेत्पुनरेव च॥ प्रदक्षिणीकृतान् देवान्स्मरेत्तत्र क्रमात्सुधीः॥६७॥जय विश्वेश विश्वा
त्मन् काशीनाथ जगद्गुरो॥त्वत्प्रसादान्महादेव कृता क्षेत्रप्रदक्षिणा॥६८॥ अनेकजन्मपापानि कृतानि मम
शंकर॥ गतानि पंचक्रोशात्मलिंगसम्यक्प्रदक्षिणात्॥६९॥त्वद्भक्तिः काशिवासश्च रहिता पापकर्मणा॥
सत्संगश्श्रवणाद्यैश्च कालो गच्छतु नः सदा॥७०॥हर शंभो महादेव सर्वज्ञ सुखदायक॥प्रायश्चित्तं तु निर्दि
ष्टं पापानां त्वत्प्रसादतः॥७१॥पुनः पापमतिर्मास्तु धर्मबुद्धिः सदास्तु मे॥ इति जप्त्वा यथाशक्त्या दत्वा दानं द्वि
जन्मनां॥७२॥बध्वा करयुगं यात्री मंत्रमेतमुदीरयेत्॥ पंचक्रोशस्य यात्रेयं यथावद्या मया कृता॥७३॥न्यू
नं संपूर्णतां यातु त्वत्प्रसादादुमापते॥ इति प्रार्थ्य महादेवं गच्छेद्देहंसकं स्वकं॥७४॥ न्यूनातिरिक्तदोषाणां परि
हाराय दक्षिणां॥ संकल्प्यागत्य च गृहं ब्राह्मणान् भोजयेत्ततः॥७५॥तत आगत्य च गृहे कुटुंबैः सह भो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पं॰मा॰ जनं॥कृत्वास्नानंततोध्यात्वाकृतकृत्योभवेन्नरः॥७६॥एकरात्रंतुमध्येयःप्रविशेच्छुचिमानसः॥वरुणा
१७ यास्तटेरम्येसयातिपरमांगतिं॥७७॥द्विरात्रिंवसतिंमध्येयःकुर्याद्धर्मतत्परः॥प्रथमंचंडिकासेत्रेद्वितीयंव
रुणातटे॥७८॥दिवसंतुवसेद्धीमान्ततोविश्वेश्वरंव्रजेत्॥यस्तुत्रिरात्रमुषितोमध्येभवतिपार्वति॥७९॥
दुर्गास्थलेभीमचंड्यांरामेशेवासमृच्छति॥वसतिंयस्तुकुरुतेमध्येदिनचतुष्टयं॥८०॥प्रथमांवसतिंकुर्या
त्कर्दमेश्वरसन्निधौ॥द्वितीयांभीमचंड्यांतुरामेशंतुतृतीयकं॥८१॥चतुर्थींकापिलेक्षेत्रेवसतिंप्रतिकल्पये
त्॥राजवृद्धकुमाराणांयथेष्टंवासमिष्यते॥८२॥यथाकथंचिद्देवेशिपंचक्रोशप्रदक्षिणं॥कुर्याद्देवनमासा
दिचिंतयेद्धर्मकोविदः॥८३॥सएवशुभदःकालोयत्रश्रद्धोदयोभवेत्॥श्रद्धाहिदुर्लभालोकेकलौखलु
विशेषतः॥८४॥श्रद्धैवतीर्थंदेवाश्चश्रद्धास्वर्गापवर्गकौ॥श्रद्धयायत्कृतंसर्वमनंतफलदंभवेत्॥८५॥
सत्यश्रद्धागुणवतीनासत्येसाफलप्रदा॥काश्यांवसतियोनित्यंस्नातिभागीरथीजले॥८६॥कुर्यात्स्वांव रामः
सरींयात्रांपंचक्रोशस्यसुंदरि॥सब्रह्मभूतोनिवसन्मामनुग्रहतःसुखी॥८७॥इतिश्रीब्रह्मवैवर्तेपंच १७

CC-0. In Public Domain. Digitization by eGangotri

काशीमाहात्म्ये चतुर्थोध्यायः॥४॥ ॥देव्युवाच॥ क्षेत्रप्रदक्षिणे देव नियमाः के भवन्ति नाथ॥ वद त्वं तारि
ताशेषविश्वनाथ कृपालय॥१॥ महादेव उवाच॥ प्रतिग्रहं परान्नं च परदाराभिभाषणं॥ परस्वग्रहणं स्नेहा
द्रसद्वार्त्तां च वर्जयेत्॥२॥ असतां पापिनां संगं न कुर्यात् प्रयतो नरः॥ असत्समागमात् सर्वं निष्फलं जायते न
णां॥३॥ ममद्रोहपरैः साकं न व्रजेद्विष्णुनिन्दकैः॥ परापवादं नो कुर्यात् परद्रोहं च वर्जयेत्॥४॥ गुरुनिन्दां
शास्त्रनिन्दां शिवधर्ममहात्मनां॥ तीर्थलिंगतपोनिन्दां न कुर्यात्तु प्रदक्षिणे॥५॥ अन्यदा तु कृतं पापं न
श्येत् क्षेत्रप्रदक्षिणात्॥ पापं प्रदक्षिणामध्ये कृतं केन प्रणाश्यते॥६॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः स्त्री
वान्त्यजातिभिः॥ कांक्षिभिः परमं तत्त्वं कर्त्तव्यं क्षेत्रदक्षिणं॥७॥ किंचिद्दानं प्रत्यहं ब्राह्मणेभ्यो देयं दीनाना
थपंग्वंधकेषु॥ भूमौ शय्या तैलमांसादि दुष्टं सर्वं वर्ज्यं तीर्थयात्रादिनेषु॥८॥ स्नानद्वयं प्रकुर्वीत नित्यश्रा
द्धं च सुंदरि॥ यदत्र किंचित् क्रियते कोटिकोटिगुणं भवेत्॥९॥ ब्रह्मचारी गृहस्थो वा वानप्रस्थोथ मस्करी॥
क्षेत्रे वसन् बहिर्वापि कुर्याद्देवप्रदक्षिणं॥१०॥ ब्रह्महत्यादिपापानां प्रायश्चित्तं न चापरं॥ बहिःकृतानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापानां मध्ये वापि सुरेश्वरि॥ ११॥ प्रायश्चित्तांतरं पुंसो न दृष्टं न मया श्रुतं॥ वसंति देवा बहवः स्वर्गभूमौ न
हिः सदा॥ १२॥ मदाज्ञां पालयंतस्ते वृ वासार्थं देव्य मागताः॥ बहिस्थिताः प्रकुर्वंति दक्षिणं क्षेत्र लब्धये॥ १३॥
ममानुग्रहमासाद्य प्रविशंति हि काशिकां॥ मदनुग्रह कामैश्च पंचक्रोशात्मकं प्रिये॥ १४॥ लिंगप्रदक्षिणी कृ
त्य द्रष्टव्योहं कृपानिधिः॥ अस्मिन् क्षेत्रे महादेवि पुण्यं पुण्यतरं तु वा॥ १५॥ अनंत कोटिगुणितं भवत्येव न संशयः॥ अंतर्गृहे कृतं पापकेवलं यातनावहं॥ १६॥ अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति॥ पुण्यक्षेत्रे कृ
तं पापं गंगातीरे विनश्यति॥ १७॥ गंगातीरे कृतं पापं वाराणस्यां विनश्यति॥ वाराणस्यां कृतं पापमंतर्गृहे॥
विनश्यति॥ १८॥ अंतर्गृहे कृतं पापं वज्रलेपो भविष्यति॥ वज्रलेप छिदं ह्येतत्पंचक्रोश प्रदक्षिणं॥ १९॥
तस्मात्सर्व प्रयत्नेन कुर्यात्क्षेत्र प्रदक्षिणं॥ वाराणसीं तु संप्राप्य प्रमादाद्यो बहिर्गतः॥ २०॥ देवास्य पुनराग
त्य दक्षिणेन प्रशुद्ध्यति॥ अविमुक्तं महाक्षेत्रं सर्वदा जननी यथा॥ २१॥ पुत्रस्य जननी लोके सर्वथा हि
न कारिणी॥ हितकृत्सर्व जंतूनां काशी हा शुत्र सर्वदा॥ २२॥ देव्युवाच॥ भगवन् सर्वभूतेश कृपापूरित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विग्रह॥ कृतार्थीनां वद विभो क्षेत्रसंन्यासिनामपि॥ २३॥ प्रदक्षिणक्रमं क्षेत्राद्बहिर्वा मध्यगोपि वा॥ नि
यमस्य न भंगः स्याद्यथा पापं च नश्यति॥ २४॥ देहिनां पापसंबंधः सर्वथा जायते क्रमात्॥ तत्काशिवास
जं नश्येत् क्षेत्रसंन्यासिनां यथा॥ २५॥ श्रीभगवानुवाच॥ सम्यक् पृष्टं त्वया देवि महाहंकारनाशनं॥ प्रायश्चि
त्तं न्यासिनां हि क्षेत्राघौघविनाशनं॥ २६॥ विधिस्तु पूर्वमेवोक्तो नियमादि युतस्तव॥ प्रदक्षिणक्रमं तेषामव
धारय सुव्रते॥ २७॥ स्नात्वा देवं समभ्यर्च्य विश्वेशं विश्वयासह॥ मोदादिपंचकं ढुंढिं दंडपाणिं च भैरवं॥ २८
॥ पूर्ववत्तीरगान् पूज्य दुर्गां पूज्य च यत्नतः॥ बहिरावरणं यत्का गणेशानां च सप्तमं॥ २९॥ मध्ये प्रदक्षिणं कु
र्यात् दक्षो वरुणपोः कृती॥ सन्मुखी भूय विधिवत् पूज्या ये वाम नस्थिताः॥ ३०॥ देवा देव्यश्च फलदाः क्षेत्रपा
लाः प्रयत्नतः॥ एकरात्रं द्विरात्रं वा वसेन्मध्ये त्रिरात्रकं॥ ३१॥ यत्र प्रद्यासु महती वसेत्तत्र न संशयः॥ प्र
त्यहं दंडपाणेस्तु पूजा कार्या प्रयत्नतः॥ ३२॥ दंडपाणेः पूजनेन सिद्धा भवति नान्यथा॥ दंडपाणे यक्षपते
क्षेत्रसन्न्यासिवल्लभ॥ ३३॥ पंचक्रोशस्य यात्रेयं सिद्धामे त्वत्प्रसादतः॥ अनेन श्लोकमंत्रेण प्रार्थना पूजनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मृतं॥ ३४॥ प्रत्यहं कुर्वता पात्रासं पूर्णा भवति ध्रुवं॥ आगत्य विश्वनाथस्य पूजाकार्यानुपूर्वेण तत्॥ ३५॥ देव्युवाच॥ प्रत्यहं दंडपाणेस्तु पूजा प्रोक्ता विशेषतः॥ किमेतद्दृढदेवेशयात्रामुद्दिश्य शंकर॥ ३६॥ महादेव उवाच॥ काशीं प्राप्य बहिर्नैव गच्छेत्सर्वात्मना क्वचित्॥ मन्मुखात्सम्यगाश्रुत्य क्षेत्रसंन्यासकृन्नमः॥ ३७॥ दंडपाणिः समभवत्तदारभ्य वरानने॥ पुनः कालांतरे देवि ऋषिभिर्नारदादिभिः॥ ३८॥ एष्टोहं क्षेत्रजनितपापनाशनमुत्तमं॥ सदासुदुर्लभं देवि भागधेयं तंत्तदा महत्॥ ३९॥ उपदिष्टं महालिंगप्रदक्षिणमशेषतः॥ तच्छ्रुत्वा दृष्टवान् दंडपाणिः क्षेत्रपरायणः॥ ४०॥ तदा मयोपदिष्टो सौ महापाशुपतव्रती॥ क्षेत्रयात्राहितेयेयं मयोक्ता दंडपाणये॥ ४१॥ अतो दंडपतेः पूजा कर्तव्या पूर्तिकारिणी॥ पंचक्रोशात्मकस्यैव लिंगस्य परमात्मनः॥ ४२॥ प्रदक्षिणमिदं कृत्वा जीवन्मुक्तो भवेन्नरः॥ देव्युवाच॥ ज्ञात्वापि श्रद्धया देव न कुर्वंति प्रदक्षिणं॥ ४३॥ तत्केन हेतुना मर्त्या उपेक्षंते महाफलं॥ महादेव उवाच॥ श्रद्धापुण्यवतां देवि न पांडित्यादिभिः क्वचित्॥ ४४॥ तस्माद्धर्मे प्रयतनां सिध्येत्सर्वं न चान्यतः॥ यत्रयत्र परित्यज्यते जनस्तत्रत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रसुखमेधते पुनः॥४५॥ साधनानि विदधाति तत्परो ये न तत्फलमवाप्नुयान्नरः॥ लौकिके परमवैदिके थ
वापामरः परमतत्त्ववित्तथा॥४६॥ मादृकः परममोदको यथा दीपते कपटभार्यया यथा॥ मोहितो न च वि
चारयत्ययं जीवनं मरणमप्यहो वशी॥४७॥ एवमेकं कालकूटं द्वंद्विपं सर्वनाशकृत्॥ तदेव शोधितं यद्वद्वि
षमप्यमृतं भवेत्॥४८॥ जगत्त्रयोक्तृत्वसकालमस्तु आत्मानमायोज्य शिवेन योगैः॥ अविघ्नमेवं स्वमलं
विसृज्य शरीरसंज्ञं मलखंडभांडं॥४९॥ मुक्तो भवेदेष न चान्यथैव मत्प्रसादान्ममचैव मुक्तः॥ कः कर्तुमेवं
प्रभवत्यविघ्नं कलौ मनुष्यो बहुदोषयुक्तः॥५०॥ अथापि मद्भक्तियुतो विमुक्तस्त्वद्भक्तियुक्तः सकलैश्च भा
वैः॥ पूर्वोदितादप्यतिदुःशको यं विमोहनार्थैरखिलैश्च शास्त्रैः॥५१॥ बीभत्सिते दुर्विषयैकदाविद्या॥
वानुरागो भविता नरस्य॥ स चेद्द्विविष्यत्परमात्मनीशे को नाम मुक्तो न भवेद्भवाब्धेः॥५२॥ अविमुक्तं मम
क्षेत्रं अविमुक्तेश्वरं शिवं॥ अविमुक्तजनं शांतं सेवंते ये धृतव्रताः॥५३॥ विमुक्ताः परमानंदे पदे स्थितिमु
पागताः ॥ अनेकजन्मसुमहत्साधनैर्ज्ञानमुत्तमं॥५४॥ प्राप्नुवंति न तद्देके न जन्मना साधुवासिनः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टांगादिभिरन्यैश्च तपोयज्ञादिभिः सदा॥५५॥ साधिते पाशिकी सिद्धिरविमुक्ते निरर्गला॥ अविमुक्ता
त्परो योगो ज्ञानं दानं जपस्तपः॥५६॥ क्षेत्रतीर्थादि नियमान संतिशुभदर्शिनां॥ अविमुक्तं समासाद्य न
त्यजेन्मोक्षकामुकः॥५७॥ क्षेत्रन्यासदृढं कृत्वा वसेद्धर्मपरः सदा॥ क्षेत्रन्यासपराणां त्वमहमप्यनुकूलजैः
॥५८॥ भोगैः सहापनां यातो दिशावः परमां गतिं॥ यथा पतिव्रता नारी भर्तारमनुगच्छति॥५९॥ तथा स
ह समालंब्य काशीमनुगतो भवेत्॥ गुरुद्रोहपरो यस्तु विप्रद्रोहपरस्तथा॥६०॥ न तस्य काशी सिध्येत
बहुभिः साधनैर्युता॥ क्षेत्रसन्यासिनामेवं क्रमः प्रोक्तो मयानघे॥६१॥ प्रदक्षिणा यास्तु महान्महापा
पहरः परः॥६२॥ इति श्री ब्रह्मवैवर्त्ते महापुराणे तृतीयविभागे पंचक्रोशीमहिमावर्णनं नाम पंचमो
ध्यायः॥५॥ समाप्तः॥ ६॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीकाशीविश्वनाथपुरीमेंमहल्लाछोटकीपिअरीपरबाबूकौलेश्वरसिंहकेमकानमेंबाबूकिशु
नदृपालसिंहकेगनेसप्रभाकरछापाखानेमे श्रीपंचकोशीमाहात्म्य छापागया जिस्कोलेनाहो
यसोनईसडकपरबाबूकौलेश्वरसिंहकेदुकानपरमिलेगा सोधावालशास्त्रीप्रभुणेनेबहुत
शुद्ध॥ सम्वत् १९४३॥मार्ग०शु०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पं·मा·
२१

इति श्री पञ्चक्रोशीमाहात्म्यं समाप्तम्

राम:
२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu